# Shri Shiva Karpurastotram

# શ્રીશિવકર્પૂરસ્તોત્રમ્

## Document Information

Text title : Shiva Karpura Stotram

File name : shivakarpUrastotram.itx

Category : shiva, AratI

Location : doc_shiva

Proofread by : Mohan Chettoor

Latest update : January 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 9, 2023

*sanskritdocuments.org*

# શ્રીશિવકર્પૂરસ્તોત્રમ્

કર્પૂરસ્યાદ્યવર્ણં તદનુ ગિરિપતે પર્દિને હૃદ્યુતસ્તે ।
 મન્ત્રઃ સાક્ષાત્ પડરર્ણો ભવતિ શુભકરઃ શત્રુવિધ્વંસકારી ।
એતન્મન્ત્રં સદા યો જપતિ નિજગુરોઃ પાદપદ્મં સ્મરન્ સન્
 પૂજ્યો ભૂત્વા સદૈવ પ્રભવતિ સ નરઃ શ્રીયમોઽન્યો રિપૂણામ્ ॥ ૧॥

ભોઃ શમ્ભો સૌષ્મકાન્તે વકરમસહિતાકારયુક્તામ્બુતીક્ષ્ણૈઃ
 પઞ્ચાર્ણો મન્ત્રરાજો ભવતિ શુભકરો મુક્તિદઃ શૈવરૂપઃ ।
તારાન્તે યે જપન્તો-હ તવમનુવરં શુદ્ધભાવૈઃ પ્રશાન્તાઃ
 તે તે સિદ્ધિં લભન્તે શિવરસમુદિતા મુક્તરૂપા મુનીન્દ્રાઃ ॥ ૨॥

શ્રીમત્માસાદયુગ્મં કૃતપુટિતમહાપઞ્ચતારૈમહેશ
 ત્વન્મન્ત્રં શામ્ભવાખ્યં સ્મરતિ યદિ જનોવારમેકં જિતાત્મા ।
ભૂત્વા પૃથ્વ્યાં સ લક્ષ્મી-પતિરપિ ચ મહાકાલકાલઃ કવીન્દ્રઃ
 પશ્ચાન્નિર્વાણ મુક્તિં સુરનુતલભતે પુણ્યપાપૈર્વિમુક્તઃ ॥ ૩॥

શમ્ભો ત્વાં શ્રીમહાપાશુપતમનુવરં સંસ્મરન્ બાણલિઙ્ગે
 સદ્યોજાતાદિવક્ત્રાર્ચનમપિ લલિતાપૂજનં ભાલદેશે ।
કુર્વઞ્છ્રીયન્ત્રપૂજાં ૧મમમમહિલાભિર્નરો બ્રહ્મરન્ધ્રે
 સાક્ષાદ્યોગીન્દ્રરૂપઃ પ્રભવતિ શિવતાં યાતિ સર્ત્યે પૃથિવ્યામ્ ॥ ૪॥

યસ્ત્વાં બ્રાહ્મ મુહુર્તે યજતિ સહ સદા ક્ષીરરુદ્રાભિષેકૈઃ
 સદ્યઃ સન્તોષ્યદેવં ગ્રહભયહરણં જાયતે તસ્ય શર્વ ।
તૈલાખ્યૈઃ શત્રુનાશં સ્મરહરદુરિતધ્વંશનં ગોપયોભિઃ
 નિર્વાણો મોક્ષરૂપઃ પ્રભવતિ કુલજઃ રકૌલરુદ્રાભિષેકૈઃ ॥ ૫॥

શિવં ત્વાં પઞ્ચાશ્યં ત્રિનયનયુતં શુદ્ધધવલં
 ચતુર્હસ્તોપેતં સુપરશુમૃગાભીતિવરદમ્ ।
સદાનન્દં વ્યાઘ્રામ્બરપરિદધાનં સ્મરહર
 સ્મરન્તિ શ્રીશૈવાસ્ત્રિવસુદલપીઠોપરિગતમ્ ॥ ૬॥

પ્રદોષે ભક્તોયો યજતિ તવ પાદામ્બુજયુગં
 સુપત્રૈર્વિલ્વૈર્વા કુશુમસલિલૈર્વા ત્રિષવણમ્ ।
પ્રશાન્તો દિવ્યો વાર્ચયતિ શિવરાત્રૌ પશુપતે
 સ એવ બ્રહ્માત્મા સ હિ ભુવનસૌખ્યઞ્ચલભતે ॥ ૭॥

નિશાયાં શ્રીચક્રં યજતિ શિવલિઙ્ગોપરિસદા
 તથા વિન્દૌ શૈવં ત્રિપુરહર નિર્વાણપરમમ્ ।
કુલદ્રવ્યૈશ્ચાહઙ્કૃતિમયવલિં યઃ પ્રકુરુતે
 પરો દિવ્યઃ કૌલો બ્રજતિ શિવતાં ભોઃ પશુપતે ॥ ૮॥

વ્રતી મૂલાધારોપરિ રસદલં દિગ્દલમથો
 પરં હૃત્પત્રાખ્યં પરશિવ મહાષોડશદલમ્ ।
ત્રિવેણ્યાં હક્ષાભ દ્વિદલકમલં બ્રહ્મમદનં
 હઠાભ્યાં સંયોગદલસતિ સુષુમ્ણાખ્યપથતઃ ॥ ૯॥

સહસ્રારેદીપાકૃતિપરમલિઙ્ગં પરશિવં
 સદા ધ્યાયન દિવ્યં સમરસયુતં હંસગપરમ્ ।
પરાન્તસ્થં શુદ્ધં જપતિયદિમન્ત્રં કુલજન-
 સ્તદા જીવન્મુક્તઃ પરમપદલીનઃ પ્રભવતિ ॥ ૧૦॥

ઇદં સ્તોત્રં સૂક્ષ્મં મનુવરસમુદ્ધારણજપ-
સ્વરૂપાખ્યમ્પૂજા-પરમશુભયોગાદિસહિતમ્ ॥

મયા ભક્ત્યા શમ્ભો તવ પરશિવાખ્યં વિરચિતં
પ્રસાદાર્થીતિઽહઙ્ગિરિશ ધનશંશેરમનુજઃ ॥ ૧૧॥

(ટિપ્પણી
૧ મનનમ્ । મન્ત્રઃ । મૌનમ્ । મનઃ । (યોગ) મુદ્રા ।
 એવં પઞ્ચમકારાઃ એવ મમમમમહિલાઃ ।
૨ મૂલાધારગતસ્વયમ્ભૂલિઙ્ગપરિ કુલાકુલક્રમેણ
 નિસૃતામૃતધારાભિષેકાનિ એવ કૌલરુદ્રાભિષેકાનીત્યુચ્યતે ।)

ઇતિ શ્રીધનશંશેર જઙ્ગવર્મ્મણાવિરચિતં વીરેન્દ્રકેસરિન્
શર્મ્મણા સંશોધિતં શ્રીશિવકર્પૂરસ્તોત્રમ્ ॥

Proofread by Mohan Chettoor

*Shri Shiva Karpurastotram*

pdf was typeset on January 9, 2023

Please send corrections to *sanskrit@cheerful.com*